[1]तन्द्रिः, [2]तनुः, [3]तन्तुः, [4]तातः, [5]तनयः, [6]तन्त्रम्, [7]तितउः.

(700) "तनु श्रद्धोपकरणयोः" (X-चुरादिः-1841. स. सेट्. उभ.)

आधृषीयः ।

'श्रद्धोपकरणार्थस्य तनेस्तनति तानयेत् ।' (श्लो. 127) इति देवः । 'उपसर्गाच्च दैर्घ्ये' (ग. सू. चुरादौ) इति पठ्यते । अत्र चकारो भिन्नक्रमः । उपसर्गात् परो यस्तनुधातुः सः दैर्घ्ये च, चकारात् श्रद्धोपकरणयोश्च णिचं विकल्पेन लभते इत्यर्थः । अनुपसृष्टात्तु श्रद्धोपकरणयोरेव णिज्विकल्पः । तानकः-निका, अवतानकः-निका, तितानयिषकः-षिका, तानकः-वितानकः-निका, तितनिषकः-षिका, तितांसकः-तितंसकः-सिका, तंतनकः-तन्तनकः, निका ;

तानयिता-अवतानयिता-त्री, तितानयिषिता-त्री, तनिता-वितनिता-त्री, तितनिषिता-तितांसिता-तितंसिता-त्री, तंतनिता-तन्तनिता-त्री ;

इत्यादीनि सर्वाण्यपि रूपाणि चौरादिककालयतिवत् (175) ज्ञेयानि । 'आधृषाद्वा' (ग. सू. चुरादौ) इति णिचो वैकल्पिकत्वेन शुद्धाद्धातोः

---

1. 'तनोतेर्ड्रिः' [द. उ. 1-79] इति ड्रिप्रत्ययः । तनोति, तन्यते इति वा तन्द्रिः = बुद्धिः ।
2. औणादिके [द. उ. 1-92] उप्रत्यये रूपम् । आहारजातं प्राप्य तनोति = विस्तारं गच्छतीति तनुः = शरीरम् ।
3. 'सितनिगमि—' [द. उ. 1-122] इति तुन्प्रत्ययः । 'तितुत्र—' (7-2-9) इतीण्णिषेधः । तन्यते इति तन्तुः = सूत्रम् ।
4. 'दुतनिभ्यां दीर्घश्च' [द. उ. 6-10] इति क्तप्रत्ययः । 'तितुत्रतथ—' (7-2-9) इति इतीण्णिषेधः । नकारलोपः । दीर्घः । तनोतीति तातः = पिता ।
5. 'वलिमलितनिभ्यः कयन्' [द. उ. 8-10] इति कयन्प्रत्ययः । तनोति कुलमिति तनयः = पुत्रः ।
6. औणादिकः [द. उ. 8-89] त्रप्रत्ययः । 'तितुत्र—' (7-2-9) इति इण्णिषेधः । तन्त्रम् = विस्तीर्णम्, शास्त्रसङ्ग्रहो वा ।
7. 'तनोतेर्डउः सन्वच्च' [द. उ. 1-160] इति डउप्रत्ययः । सन्वद्भावात् द्वित्वादि-कार्यम् । टिलोपः । विकृतनिर्देशात् सन्धिकार्यं न । तनोति = पिष्टद्रव्याणि शोधयतीति तितउः = चालिनी । 'चालिनी तितउः पुमान् ।' इत्यमरः ।